www.sgbauonline.com

**AU–2017**

**B.A. (Part-I) Semester-I Examination**

**(Modern Indian Language)**

**SANSKRIT COMPULSORY**

Time : Three Hours] [Maximum Marks : 80

**Note :—** (1) **All** questions are compulsory.
**सर्व** प्रश्न अनिवार्य आहेत.
**सभी** प्रश्न अनिवार्य हैं।

(2) Write answers in the offered medium.
उत्तरे स्वीकृत माध्यमातून लिहावीत.
उत्तर स्वीकृत माध्यम में लिखिये।

1. (अ) Translate any **TWO** of the following : 10

खालीलपैकी कोणत्याही **दोन** उताऱ्यांचा अनुवाद करा :

किसी **दो** पाठ्यांशों का अनुवाद करें :

(1) अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्ष:। तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरद्गवनामा गृध्र: प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिन: पक्षिण: स्वाहारात्किंञ्चित्किञ्चिदुद्धृत्य ददति। तेनासौ जीवति। शावकानां रक्षणं करोति। अथ कदाचित् दीर्घकर्णनामा मार्जार: पक्षिशावकान् भक्षयितुं तत्रागत:।

(2) सोऽवदत्। अहमत्र गङ्गातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि। यूयं धर्मज्ञानरता इति विश्वासभूमय: पक्षिण: सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति। अतो महद्भ्यो विद्यावयवृद्धेभ्यो धर्म श्रोतुमिहागत:। भवन्त: श्चैतावदृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यता।

(3) अशोक:—देवि नाहं भवत्कृतस्वागतार्ह:। मादृशस्य दुष्टस्य पापाधमस्य च हार्दिकं स्वागतं नाम मूर्तिमंत: पिशाच्चस्यैव स्वागतं मन्ये। देवी–किमेवमभद्रं वदत्यार्यपुत्र:। (साश्चर्यम्) किमेवंविधं पापकृत्यं कृतमार्यपुत्रेण। प्रत्युत कृतासामान्य पराक्रम: पराजित: बलाढ्यरिपु: प्रत्यागतोऽत्रभवान्। किमत्रदोषास्पदम्।

(4) अशोक:—ततश्च मम बन्धुमाहूय पुत्तलिकां दर्शयित्वाङ्गुल्या कर्णेकथितम् यत्त्व राज्यहुर्तकाममेकाकिनं जहि बन्धुमशोकं कीडाङ्गणे स्थितमनेन खड्गेन। मत्सराग्निना व्याकुलस्तद्वयसि विश्वस्तो धृतखड्ग पुत्तलिकां प्रति प्रधावन् गर्तायां पतितो दग्धश्च प्रज्वलानेन।



www.sgbauonline.com

(ब) Write the moral of the story 'गृध्रमार्जारकथा' in your own words. 6

गृध्रमार्जारकथेचा बोध आपल्या शब्दात लिहा

गृध्रमार्जारकथा का बोध अपने शब्दों में लिखें।

**OR/किंवा/अथवा**

How did Ashoka's mind change ?

अशोकांचे मनपरिवर्तन कसे घडले ?

अशोक का मनपरिवर्तन कैसे हुआ ?

2. (अ) Translate any **TWO** from the following : 10

खालीलपैकी कोणत्याही **दोन** उताऱ्यांचा अनुवाद करा :

किसी **दो** गद्यांशों का अनुवाद करें :

(1) भारतस्य भूमिः नाम नारिरत्नानां खनिः एव। विविधेषु क्षेत्रेषु स्वतेजसा प्रकाशमाना: एता: नार्यः भारतमातुः भूषणानि खलु। झांशी संस्थानस्य राज्ञी लक्ष्मीबाई, पुण्यश्लोका अहिल्याबाई होलकरः, मान्यवरा इंदिरागांधी इत्यादिषु आकाश मण्डलं स्पृशन्ती कल्पनाचावला नाम अवकाशवीरांगना न केवलं भारते अपितु सर्वस्मिन्विश्वे लब्धकीर्तिरभवत् स्वकर्मणा।

(2) मनस्वी कार्यार्थी लघुक्षेत्रे बद्धः न भवति। अधुना कल्पनायाः कृते विशालं क्षेत्रं विततमासीत्। स्ववयसः एकविंशतितमे वर्षे तथा कॅलिफोर्नियामध्ये लॉस अल्टोस ग्रामे ओव्हरसे मेथडस् इति संस्थायाः उपाध्यक्षपदं प्राप्तम्। तत्रैव संशोधक शास्त्रज्ञा इति पदमपि प्राप्तम्। 1994 तमे वर्षे नॅशनल एरोनाटिक्स अॅण्ड स्पेस अॅडमिनिस्ट्रेशन (NASA) इति संस्थया तस्या अवकाशवीररूपेण चयनं कृतम्।

(3) तद्दिनेऽपि तस्मिन्कार्यालये सर्वं यथातथं प्रचलतिस्म। अनिलमहादेयः द्वादशवादनपर्यन्तम् चतुर्वारं बहिर्गत्वा धूमास्वादनं कृत्वा प्रत्यागतः। सुश्री मोनाली स्यूततः दर्पणिकां निष्कास्य षड्वारं स्वमुखमपश्यत्। पञ्चवारंच ओष्ठरागशलाकायाः प्रयोगमप्यकरोत्।

(4) अहो प्रशादशाब, शीघ्रं गम्यतां शाबसमिपे ! अतीवकुपितस्तत्रभवान् इति उच्चैः स निवेदितवान्। तस्य गर्जनया बल्लूप्रसादस्य तमाखुसमाधिः भग्नः। सरभसं उत्तिष्ठितस्य तस्य यूतकं उत्पीठिकायाः बहिर्निर्गते कस्मिन्नपि कीले दृढं लग्नम्। किन्तु मुखविवरे संचीयमानं तमाखूरसं कुत्र वा ष्ठीव्यामि इति एकस्मिन्नेव विचारे केन्द्रीभूतचित्तेन तेन न तद् लक्षितम्।



www.sgbauonline.com

www.sgbauonline.com

(ब) Sketch the character of कल्पना चावला. 6

कल्पना चावलाचे जीवनचरित्र रेखाटा.

कल्पना चावला का जीवनचरित्र लिखिये।

**OR/किंवा/अथवा**

How the funny jokes are shown in the office in the lesson 'कस्यचित् कीलकस्य'.

कस्यचित् कीलकस्य ! पाठातील विनोद वर्णन करा.

कस्यचित् कीलकस्य पाठ के विनोद स्पष्ट करें।

3. (अ) Translate any **TWO** श्लोकs of the following : 10

कोणत्याही **दोन** श्लोकांचा अनुवाद करा :

किसी **दो** श्लोकों का अनुवाद कीजिये :

(1) कपिरूपं परित्यज्य हनुमानमारुतात्मजः।
भिक्षुरूपं ततो भेजे शठबुद्धितया कपिः।
ततश्च हनुमान् वाचा श्लक्ष्णया सुमनोज्ञया।
विनीतवदुपागम्य राघवौ प्रणिपत्य च।

(2) तत् तस्य वाक्यं निपुणं निशम्य।
प्रहृष्टरूपः पवनात्मजः कपिः।
मनः समाधाय जयोयपत्तौ।
सख्यं तदा कर्तुमियेष ताभ्याम्।

(3) उद्योगिनः पुरुषसिंहनुपैति लाक्ष्मीः।
देवं हि दैवेन देयमिति का पुरुषावदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्धति कोऽत्र दोषाः।

(4) वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णानि
अन्यानि संयाति नवानि देही।



www.sgbauonline.com

www.sgbauonline.com

(ब) Explain the importance of speech according to the lesson 'वाणीप्रशंसा'. 6

'वाणीप्रशंसा' पाठाच्या आधारे वाणीचे वैभव स्पष्ट करा.

'वाणीप्रशंसा' पाठ के आधार से वाणी का वैभव विशद करें।

**OR/किंवा/अथवा**

What is 'प्रहेलिका' ? Explain with example.

'प्रहेलिका' म्हणजे काय ? सोदाहरण स्पष्ट करा.

'प्रहेलिका' का अर्थ क्या है ? सोदाहरण स्पष्टीकरण कीजिये।

4. (अ) Translate any **TWO** श्लोकाऽ of the following : 10

खालीलपैकी कोणत्याही **दोन** श्लोकांचा अनुवाद करा :

किसी दो श्लोकों का अनुवाद कीजिये

(1) पत्रपुष्पफलानांच रजोरेणु समागमाः

पोषयन्ति च पितरं प्रत्यहे प्रतिकर्मणि।

यस्तु वृक्षं प्रकुरुते छायापुष्पफलोगम

पथि देवालये चापि पापात्तारयते पितृन्।।

(2) प्लक्षोभार्याप्रदश्चैव बिष्वआयुष्यदः स्मृतः

धनप्रदो जम्बुवृक्षो ब्रह्मदः प्लक्षवृक्षकः।

स्वर्गप्रदो घातकीस्यात् वटो मोक्षप्रदायकः

सहकारः कामप्रदो गुवाकः सिद्धिमादिशेत्।।

(3) अचिरादथसंत्यज्य गान्धिमोहमयिं पुरिम्।

सेवाग्राममगाल्लोकैश्चिरकालप्रतिक्षितः।।

ग्रामिणा ये पुरातस्य प्रवासाद्दुर्मनायिताः।

प्रफुल्लवदनास्तेऽपि बभूवदर्शनोत्सुकाः।।

(4) जयतु जयतु गांधी शान्तिभाजां वरेण्यो

यमनियमसुनिष्ठः प्रौढसत्याग्रहीन्द्रः।।

हिमरूचिरिवपूर्णा सान्द्रलोकान्धकारः।

विशदसुनयबोधैरंशुजालैर्निरस्यन्।।



www.sgbauonline.com

www.sgbauonline.com

(ब) Explain the importance of trees according to the lesson 'वृक्षमहिमा'. 6

वृक्षमहिमा पाठाच्या आधारे वृक्षांचे महत्व स्पष्ट करा.

वृक्षमहिमा पाठ के आधार से वृक्षों का महत्व विशद कीजिये।

**OR/किंवा/अथवा**

Write the celebration of 'गांधीजन्म' in your own words.

महात्मा गांधींचा जन्मोत्सव प्रसंग आपल्या शब्दात लिहा.

महात्मा गांधी जन्मोत्सव प्रसंग अपने शब्दों में स्पष्ट करें।

5. Choose the correct alternative of any **16** : 16

खालीलपैकी कोणत्याही **16** प्रश्नांचे योग्य पर्याय निवडा :

किन्हीं **16** प्रश्नों के योग्य पर्याय लिखिये :

(1) श्रीरामस्य दिव्यचरित्रं महर्षि वाल्मीकये केन कथितम् ?

(1) देवर्षि नारद: (2) व्यास:

(3) भगवान नारायण:

(2) रामायणस्य आरम्भ: कस्य राज्ञ: चरित्रेण अभवत् ?

(1) दिलीप: (2) दशरथ:

(3) इक्ष्वाकु:

(3) वाली कस्य अंश आसीत् ?

(1) विष्णु (2) इन्द्र:

(3) सूर्य:

(4) श्रीरामस्य मातु: नाम किम् ?

(1) सुमित्रा (2) कौशल्या

(3) कैकयी

(5) श्रीरामादि भ्रातृणाम् प्राथमिक शिक्षणं कस्य आश्रमे अभवत् ?

(1) वाल्मीकि: (2) विश्वामित्र:

(3) वशिष्ठ:



www.sgbauonline.com

www.sgbauonline.com

(6) लक्ष्मणस्य भार्यायाः नाम किम् ?

(1) मांडवी (2) उर्मिला

(3) सीता

(7) शिवधनुर्भंगकारणात् कः मुनिः संतप्तः ?

(1) परशुरामः (2) विश्वामित्र

(3) दुर्वासः

(8) संतप्ता कैकयी कुत्र गतवती ?

(1) कोपभवन (2) समुद्रगृहम

(3) प्रमदवनम्

(9) वनगमनसमये श्रीरामस्य रथः केन चलितः ?

(1) मातली: (2) सुमन्त्रः

(3) श्रीकृष्णः

(10) चित्रकूटे श्रीरामेण कस्याः नद्याः तीरे पर्णकुटी निर्मिता ?

(1) यमुना (2) शरयू

(3) मंदाकिनी

(11) श्रीरामस्य अग्रे नास्तिक मतं केन स्थापितम् ?

(1) जाबाली (2) शौणकः

(3) नारदः

(12) श्रीरामाय दिव्यस्त्रप्रदानं केन कृतम् ?

(1) महर्षि कण्व (2) महर्षि नारद

(3) महर्षि अगस्ती

(13) सीता हरणार्थ रावणेन कस्य साहाय्यं स्वीकृतम् ?

(1) माल्यवान (2) मारिचः

(3) खरः



www.sgbauonline.com

www.sgbauonline.com

(14) सीताहरण समये रावणस्य प्रतिकार: केन कृत: ?

(1) जटायु (2) संपाती

(3) गृध्र:

(15) सुग्रीव: कस्मिन् पर्वते निवसति स्म ?

(1) हिमालय: (2) ऋष्यमूक:

(3) महेंद्र:

(16) वाले: विदुषी भार्याया: नाम् किम् ?

(1) मन्दोदरी (2) तारा

(3) द्रोपदी

(17) लंकाया: मार्गे: हनुमन्तं क: पर्वत: मिलित: ?

(1) विन्ध: (2) हिमालय:

(3) मैनाक:

(18) श्रीरामेण लंकायां पूर्वद्वारे सेनापति रूपेण: कस्य स्थापना कृता ?

(1) जाम्बुवत: (2) नील:

(3) खर:

(19) संजीवनी वनस्पती कस्मिन् पर्वते आसीत् ?

(1) रामगिरी (2) द्रोणागिरी

(3) सप्तगिरी

(20) सहस्त्रार्जुनस्य राजधाने: नाम किम् ?

(1) महिष्मती (2) अयोध्या

(3) द्वारका



www.sgbauonline.com

www.sgbauonline.com

www.sgbauonline.com